श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.7- Pratham Sopaan



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्**

***nārāyaṇaṃ (n) namaskṛtya, naraṃ(ñ)caiva narottamam***
**devīṃ(m) sarasvatīṃ (m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

***nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam***
***praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param***

**॥ॐ नमो भगवते वासुदेवाय ॥**
**॥ अथ सप्तमोऽध्यायः - ७ ॥**

**.. oṃ namo bhagavate vāsudevāya ..**

**..atha saptamo'dhyāyaḥ - 7 ..**

**श्रीभगवानुवाच**

**यदात्थ मां(म्) महाभाग, तच्चिकीर्षितमेव मे ।**
**ब्रह्मा भवो लोकपालाः(स्), स्वर्वासं(म्) मेऽभिकाङ्क्षिणः ॥ 1॥**

**śrībhagavānuvāca**

**yadāttha māṃ(m) mahābhāga, taccikīrṣitameva me .**
**brahmā bhavo lokapālāḥ(s), svarvāsaṃ(m) me'bhikāṅkṣiṇaḥ .. 1..**

tacci + kīrṣi +tameva, me'bhi + kāṅkṣiṇaḥ

**मया निष्पादितं(म्) ह्यत्र, देवकार्यमशेषतः ।**

**यदर्थमवतीर्णोऽह- मं(व्)शेन ब्रह्मणार्थितः ॥ 2॥**

**mayā niṣpāditaṃ(m) hyatra, devakāryamaśeṣataḥ .**

**yadarthamavatīrṇo'ha-maṃ(v)śena brahmaṇārthitaḥ .. 2..**

devakārya+ maśeṣataḥ, yadartha + mava + tīrṇo'ha, brahmaṇār + thitaḥ

**कुलं(म्) वै शापनिर्दग्धं(न्), नङ्क्ष्यत्यन्योन्यविग्रहात् ।**

**समुद्रः(स्) सप्तमेऽह्न्येतां(म्), पुरीं(ञ्) च प्लावयिष्यति ॥ 3॥**

**kulaṃ(m) vai śāpanirdagdhaṃ(n), naṅkṣyatyanyonyavigrahāt .**

**samudraḥ(s) saptame'hnyetāṃ(m), purīṃ(ñ) ca plāvayiṣyati .. 3..**

naṅkṣyat + yan + yonya + vigrahāt, sapta + me'h + nyetāṃ(m), plā + vayiṣyati

**यर्ह्येवायं(म्) मया त्यक्तो, लोकोऽयं(न्) नष्टमं(ङ्)गलः ।**

**भविष्यत्यचिरात् साधो, कलिनापि निराकृतः ॥ 4॥**

**yarhyevāyaṃ(m) mayā tyakto, loko'yaṃ(n) naṣṭama(ṅ)galaḥ .**

**bhaviṣyatyacirāt sādho, kalināpi nirākṛtaḥ .. 4..**

yar+ hye + vāyaṃ(m), bhaviṣyat + yacirāt

**न वस्तव्यं(न्) त्वयैवेह, मया त्यक्ते महीतले ।**

**जनोऽधर्मरुचिर्भद्र, भविष्यति कलौ युगे ॥ 5॥**

**na vastavyaṃ(n) tvayaiveha, mayā tyakte mahītale .**

**jano'dharmarucirbhadra, bhaviṣyati kalau yuge .. 5..**

jano' + dharma + rucir + bhadra

**त्वं(न्) तु सर्वं(म्) परित्यज्य, स्नेहं(म्) स्वजनबन्धुषु ।**

**मय्यावेश्य मनः(स्) सम्यक्, समदृग् विचरस्व गाम् ॥ 6॥**

**tvaṃ(n) tu sarvaṃ(m) parityajya, snehaṃ(m) svajanabandhuṣu .**

**mayyāveśya manaḥ(s) saṃyak, samadṛgvicarasva gām .. 6..**

यदिदं(म्) मनसा वाचा, चक्षुर्भ्यां(म्) श्रवणादिभिः ।
नश्वरं(ङ्) गृह्यमाणं(ञ्) च, विद्धि मायामनोमयम् ॥ 7॥

yadidaṃ(m) manasā vācā, cakṣurbhyāṃ(m) śravaṇādibhiḥ .
naśvaraṃ(ṅ) gṛhyamāṇaṃ(ñ) ca, viddhi māyāmanomayam .. 7..

śravaṇā + dibhiḥ, māyā + mano + mayam

पुं(व्)सोऽयुक्तस्य नानार्थो, भ्रमः(स्) स गुणदोषभाक् ।
कर्माकर्मविकर्मेति, गुणदोषधियो भिदा ॥ 8॥

puṃ(v)so'yuktasya nānārtho, bhramaḥ(s) sa guṇadoṣabhāk .
karmākarmavikarmeti, guṇadoṣadhiyo bhidā .. 8..

puṃ(v)so'+ yuktasya, karmā + karma + vikarmeti

तस्माद् युक्तेन्द्रियग्रामो, युक्तचित्त इदं(ञ्) जगत् ।
आत्मनीक्षस्व विततमात्मानं(म्) मय्यधीश्वरे ॥ 9॥

Tasmād yuktendriyagrāmo, yuktacitta idaṃ(ñ) jagat .
ātmanīkṣasva vitata- mātmānaṃ(m) mayyadhīśvare .. 9..

yuktendri + yagrāmo, āt + manī + kṣasva, mayya + dhīśvare

ज्ञानविज्ञानसं(य्)युक्त, आत्मभूतः(श्) शरीरिणाम् ।
आत्मानुभवतुष्टात्मा, नान्तरायैर्विहन्यसे ॥ 10॥

jñānavijñānasaṃ(y)yukta, ātmabhūtaḥ(ś) śarīriṇām .
ātmānubhavatuṣṭātmā, nāntarāyairvihanyase .. 10..

Jñāna + vijñāna + saṃ(y)yukta, ātmā + nubhava + tuṣṭātmā, nān + tarāyair + vihanyase

दोषबुद्ध्योभयातीतो, निषेधान्न निवर्तते ।
गुणबुद्ध्या च विहितं(न्), न करोति यथार्भकः ॥ 11॥

doṣabuddhyobhayātīto, niṣedhānna nivartate .
guṇabuddhyā ca vihitaṃ(n), na karoti yathārbhakaḥ .. 11..

doṣa + buddhyo + bhayātīto, niṣedhān + na

सर्वभूतसुहृच्छान्तो, ज्ञानविज्ञाननिश्चयः ।
पश्यन् मदात्मकं(म्) विश्वं(न्), न विपद्येत वै पुनः ॥ 12॥

sarvabhūtasuhṛcchānto, jñānavijñānaniścayaḥ .
paśyan madātmakaṃ(m) viśvaṃ(n), na vipadyeta vai punaḥ .. 12..

sarvabhūta +suhṛc + chānto, jñāna + vijñāna + niścayaḥ

श्रीशुक उवाच

इत्यादिष्टो भगवता, महाभागवतो नृप ।
उद्धवः(फ्) प्रणिपत्याह, तत्त्वजिज्ञासुरच्युतम् ॥ 13॥

śrīśuka uvāca

ityādiṣṭo bhagavatā, mahābhāgavato nṛpa .
uddhavaḥ(ph) praṇipatyāha, tattvajijñāsuracyutam .. 13..

praṇi + patyāha, tattva + jijñāsu + racyutam

उद्धव उवाच

योगेश योगविन्यास, योगात्मन् योगसम्भव ।
निः(श्)श्रेयसाय मे प्रोक्तस्- त्यागः(स्) सं(न्)न्यासलक्षणः ॥ 14॥

uddhava uvāca

yogeśa yogavinyāsa, yogātman yogasambhava .
niḥ(ś)śreyasāya me proktas- tyāgaḥ(s) san(n)nyāsalakṣaṇaḥ .. 14..

त्यागोऽयं(न्) दुष्करो भूमन्, कामानां(म्) विषयात्मभिः ।
सुतरां(न्) त्वयि सर्वात्मन्- नभक्तैरिति मे मतिः ॥ 15॥

tyāgo'yaṃ(n) duṣkaro bhūman, kāmānāṃ(m) viṣayātmabhiḥ .
sutarāṃ(n) tvayi sarvātman- nabhaktairiti me matiḥ .. 15..

सोऽहं(म्) ममाहमिति मूढमतिर्विगाढस्-
त्वन्मायया विरचितात्मनि सानुबन्धे।

तत्त्वञ्जसा निगदितं(म्) भवता यथाहं(म्),
संं(व्)साधयामि भगवन्ननुशाधि भृत्यम् ॥ 16॥

**so'haṃ(m) mamāhamiti mūḍhamatirvigāḍhas-**
**tvanmāyayā viracitātmani sānubandhe .**
**tattvañjasā nigaditaṃ(m) bhavatā yathāhaṃ(m)**
**saṃ(v)sādhayāmi bhagavannanuśādhi bhṛtyam .. 16..**

mūḍha+ matir + vigāḍhas, tvan + māyayā, bhagavan + nanuśādhi

सत्यस्य ते स्वदृश आत्मन आत्मनोऽन्यं(म्),
वक्तारमीश विबुधेष्वपि नानुचक्षे।
सर्वे विमोहितधियस्तव माययेमे,
ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥ 17॥

**satyasya te svadṛśa ātmana ātmano'nyaṃ(m),**
**vaktāramīśa vibudheṣvapi nānucakṣe .**
**sarve vimohitadhiyastava māyayeme,**
**brahmādayastanubhṛto bahirarthabhāvāḥ .. 17..**

vimo + hita + dhiyas + tava, brahmā + dayas + tanubhṛto

तस्माद् भवन्तमनवद्यमनन्तपारं(म्),
सर्वज्ञमीश्वरमकुण्ठविकुण्ठधिष्ण्यम् ।
निर्विण्णधीरहमु ह वृजिनाभितप्तो,
नारायणं(न्) नरसखं(म्) शरणं(म्) प्रपद्ये ॥ 18॥

**Tasmād bhavantamanavadyamanantapāraṃ(m)**
**sarvajñamīśvaramakuṇṭhavikuṇṭhadhiṣṇyam .**
**nirviṇṇadhīrahamu ha vṛjinābhitapto,**
**nārāyaṇaṃ(n) narasakhaṃ(m) śaraṇaṃ(m) prapadye .. 18..**

bhavanta +manavadya +mananta + pāraṃ(m),

sarvajñamīśvara +makuṇṭha + vikuṇṭha + dhiṣṇyam,

nirviṇṇa + dhīrahamu, vṛjinā + bhitapto

**श्रीभगवानुवाच**

**प्रायेण मनुजा लोके, लोकतत्त्वविचक्षणाः।**

**समुद्धरन्ति ह्यात्मान- मात्मनैवाशुभाशयात् ॥19॥**

**śrībhagavānuvāca**

**prāyeṇa manujā loke, lokatattvavicakṣaṇāḥ .**

**samuddharanti hyātmāna- mātmanaivāśubhāśayāt .. 19..**

loka +tattva + vicakṣaṇāḥ, samud + dharanti, mātma + naivā + śubhā + śayāt

**आत्मनो गुरुरात्मैव, पुरुषस्य विशेषतः ।**

**यत् प्रत्यक्षानुमानाभ्यां(म्), श्रेयोऽसावनुविन्दते ॥ 20॥**

**ātmano gururātmaiva, puruṣasya viśeṣataḥ .**

**yat pratyakṣānumānābhyāṃ(m), śreyo'sāvanuvindate .. 20..**

Guru + rātmaiva, pratyakṣā + numānābhyāṃ(m), śreyo' + sāva + nuvindate

**पुरुषत्वे च मां(न्) धीराः(स्), साङ्ख्ययोगविशारदाः ।**

**आविस्तरां(म्) प्रपश्यन्ति, सर्वशक्त्युपबृं(व्)हितम् ॥ 21॥**

**puruṣatve ca māṃ(n) dhīrāḥ(s), sāṅkhyayogaviśāradāḥ .**

**āvistarāṃ(m) prapaśyanti, sarvaśaktyupabṛṃ(v)hitam .. 21..**

sāṅkhya + yoga + viśāradāḥ, sarva + śaktyupa + bṛṃ(v)hitam

**एकद्वित्रिचतुष्पादो, बहुपादस्तथापदः ।**

**बह्व्यः(स्) सन्ति पुरः(स्) सृष्टास्- तासां(म्) मे पौरुषी प्रिया ॥ 22॥**

**ekadvitricatuṣpādo, bahupādastathāpadaḥ .**

**bahvyaḥ(s) santi puraḥ(s) sṛṣṭās- tāsāṃ(m) me pauruṣī priyā .. 22..**

ekad + vitri + catuṣ + pādo, bahupādas + tathā + padaḥ

**अत्र मां(म्) मार्गयन्त्यद्धा, युक्ता हेतुभिरीश्वरम् ।**

**गृह्यमाणैर्गुणैर्लिङ्गै- रग्राह्यमनुमानतः ॥ 23॥**

atra māṃ(m) mārgayantyaddhā, yuktā hetubhirīśvaram .

gṛhyamāṇairguṇairliṅgai- ragrāhyamanumānataḥ .. 23..

mārgayan + tyaddhā, hetubhi + rīśvaram, gṛhya + māṇair + guṇair + liṅgai

अत्राप्युदाहरन्तीम- मितिहासं(म्) पुरातनम् ।

अवधूतस्य सं(व्)वादं(म्), यदोरमिततेजसः ॥ 24 ॥

atrāpyudāharantīma- mitihāsaṃ(m) purātanam .

avadhūtasya saṃ(v)vādaṃ(m), yadoramitatejasaḥ .. 24..

atrāp + yudā + harantīma, yado + ramita + tejasaḥ

अवधूतं(न्) द्विजं(ङ्) कं(ञ्)चिच्- चरन्तमकुतोभयम् ।

कविं(न्) निरीक्ष्य तरुणं(म्), यदुः(फ्) पप्रच्छ धर्मवित् ॥ 25 ॥

avadhūtaṃ(n) dvijaṃ(ṅ) kañ(ñ)cic- carantamakutobhayam .

kaviṃ(n) nirīkṣya taruṇaṃ(m), yaduḥ(ph) papraccha dharmavit .. 25..

caran + tama + kutobhayam

यदुरुवाच

कुतो बुद्धिरियं(म्) ब्रह्मन्- नकर्तुः(स्) सुविशारदा ।

यामासाद्य भवाँल्लोकं(म्), विद्वां(व्)श्चरति बालवत् ॥ 26 ॥

yaduruvāca

kuto buddhiriyaṃ(m) brahman- nakartuḥ(s) suviśāradā .

yāmāsādya bhavāṁllokaṃ(m), vidvāṃ(v)ścarati bālavat .. 26..

vid+vāṃ(v)ś + carati

प्रायो धर्मार्थकामेषु, विवित्सायां(ञ्) च मानवाः ।

हेतुनैव समीहन्ते, आयुषो यशसः(श्) श्रियः ॥ 27 ॥

prāyo dharmārthakāmeṣu, vivitsāyāṃ(ñ) ca mānavāḥ .

hetunaiva samīhante, āyuṣo yaśasaḥ(ś) śriyaḥ .. 27..

dharmārtha + kāmeṣu

त्वं(न्) तु कल्पः(ख्) कविर्दक्षः(स्), सुभगोऽमृतभाषणः ।
न कर्ता नेहसे किं(ञ्)चिज्- जडोन्मत्तपिशाचवत् ॥ 28॥

tvaṃ(n) tu kalpaḥ(kh) kavirdakṣaḥ(s), subhago'mṛtabhāṣaṇaḥ .
na kartā nehase kiñ(ñ)cij- jaḍonmattapiśācavat .. 28..

subhago' + mṛta + bhāṣaṇaḥ, jaḍon + matta + piśācavat

जनेषु दह्यमानेषु, कामलोभदवाग्निना ।
न तप्यसेऽग्निना मुक्तो, गं(ङ्)गाम्भः(स्)स्थ इव द्विपः ॥ 29॥

janeṣu dahyamāneṣu, kāmalobhadavāgninā .
na tapyase'gninā mukto, gaṅ(ṅ)gāmbhaḥ(s)stha iva dvipaḥ .. 29..

Kāmalo + bhada + vāgninā, gaṅ(ṅ)gām + bhaḥ(s)stha

त्वं(म्) हि नः(फ्) पृच्छतां(म्) ब्रह्मन्- नात्मन्यानन्दकारणम् ।
ब्रूहि स्पर्शविहीनस्य, भवतः(ख्) केवलात्मनः ॥ 30॥

tvaṃ(m) hi naḥ(ph) pṛcchatāṃ(m) brahman- nātmanyānandakāraṇam .
brūhi sparśavihīnasya, bhavataḥ(kh) kevalātmanaḥ .. 30..

nātmanyā + nandakāraṇam, sparśa + vihīnasya

श्रीभगवानुवाच
यदुनैवं(म्) महाभागो, ब्रह्मण्येन सुमेधसा ।
पृष्टः(स्) सभाजितः(फ्) प्राह, प्रश्रयावनतं(न्) द्विजः ॥ 31॥

śrībhagavānuvāca
yadunaivaṃ(m) mahābhāgo, brahmaṇyena sumedhasā .
pṛṣṭaḥ(s) sabhājitaḥ(ph) prāha, praśrayāvanataṃ(n) dvijaḥ .. 31..

praśrayā + vanataṃ(n)

ब्राह्मण उवाच
सन्ति मे गुरवो राजन्, बहवो बुद्ध्युपाश्रिताः ।
यतो बुद्धिमुपादाय, मुक्तोऽटामीह ताञ्छृणु ॥ 32॥

brāhmaṇa uvāca

santi me guravo rājan, bahavo buddhyupāśritāḥ .

yato buddhimupādāya, mukto'ṭāmīha tān śṛṇu .. 32..

bud + dhyu + pāśritāḥ, buddhi + mupādāya, mukto' + ṭāmīha

पृथिवी वायुराकाश- मापोऽग्निश्चन्द्रमा रविः ।

कपोतोऽजगरः(स्) सिन्धुः(फ्), पतं(ङ्)गो मधुकृद् गजः ॥ 33 ॥

pṛthivī vāyurākāśa- māpo'gniścandramā raviḥ .

kapoto'jagaraḥ(s) sindhuḥ(ph), pataṅ(ṅ)go madhukṛd gajaḥ .. 33..

māpo'gniś + candramā

मधुहा हरिणो मीनः(फ्), पिं(ङ्)गला कुररोऽर्भकः।

कुमारी शरकृत् सर्प, ऊर्णनाभिः(स्) सुपेशकृत्॥ 34 ॥

madhuhā hariṇo mīnaḥ(ph), piṅ(ṅ)galā kuraro'rbhakaḥ .

kumārī śarakṛt sarpa, ūrṇanābhiḥ(s) supeśakṛt .. 34..

kuraro'r + bhakaḥ

एते मे गुरवो राजं(व्)श्- चतुर्विं(व्)शतिराश्रिताः ।

शिक्षा वृत्तिभिरेतेषा- मन्वशिक्षमिहात्मनः ॥ 35 ॥

ete me guravo rājan(v)ś- caturviṃ(v)śatirāśritāḥ .

śikṣā vṛttibhireteṣā- manvaśikṣamihātmanaḥ .. 35..

catur + viṃ(v)śati + rāśritāḥ, vṛtti + bhire + teṣā,

manva + śikṣa + mihātmanaḥ

यतो यदनुशिक्षामि, यथा वा नाहुषात्मज ।

तत्तथा पुरुषव्याघ्र, निबोध कथयामि ते ॥ 36 ॥

yato yadanuśikṣāmi, yathā vā nāhuṣātmaja .

tattathā puruṣavyāghra, nibodha kathayāmi te .. 36..

yadanu + śikṣāmi, tat + tathā

भूतैराक्रम्यमाणोऽपि, धीरो दैववशानुगैः ।
तद् विद्वान्न चलेन्मार्गा- दन्वशिक्षं(ङ्) क्षितेर्व्रतम् ॥ 37॥

**bhūtairākramyamāṇo'pi, dhīro daivavaśānugaiḥ .**
**tadvidvānna calenmārgā- danvaśikṣam(ṅ) kṣitervratam .. 37..**

bhūtai + rākramya + māṇo'pi, daiva + vaśānugaiḥ

शश्वत्परार्थसर्वेहः(फ्), परार्थैकान्तसम्भवः ।
साधुः(श्) शिक्षेत भूभृत्तो, नगशिष्यः(फ्) परात्मताम् ॥ 38॥

**śaśvatparārthasarvehaḥ(ph), parārthaikāntasambhavaḥ .**
**sādhuḥ(ś) śikṣeta bhūbhṛtto, nagaśiṣyaḥ(ph) parātmatām .. 38..**

Śaśvat + parārtha + sarvehaḥ(ph), parār + thaikānta + sambhavaḥ

प्राणवृत्त्यैव सन्तुष्येन्- मुनिर्नैवेन्द्रियप्रियैः ।
ज्ञानं(म्) यथा न नश्येत, नावकीर्येत वाङ्मनः ॥ 39॥

**prāṇavṛttyaiva santuṣyen- munirnaivendriyapriyaiḥ .**
**jñānam(m) yathā na naśyeta, nāvakīryeta vāṅmanaḥ .. 39..**

prāṇa + vṛt + tyaiva, munir + naivendri + yapriyaiḥ, nāva + kīr +yeta

विषयेष्वाविशन् योगी, नानाधर्मेषु सर्वतः ।
गुणदोषव्यपेतात्मा, न विषज्जेत वायुवत् ॥ 40॥

**viṣayeṣvāviśan yogi, nānādharmeṣu sarvataḥ .**
**guṇadoṣavyapetātmā, na viṣajjeta vāyuvat .. 40..**

viṣayeṣ + vāviśan, guṇadoṣa + vyape + tātmā

पार्थिवेष्विह देहेषु, प्रविष्टस्तद्गुणाश्रयः ।
गुणैर्न युज्यते योगी, गन्धैर्वायुरिवात्मदृक् ॥ 41॥

**pārthiveṣviha deheṣu, praviṣṭastadguṇāśrayaḥ .**
**guṇairna yujyate yogi, gandhairvāyurivātmadṛk .. 41..**

Pārthi + veṣviha, praviṣṭas + tad + guṇāśrayaḥ, gandhair + vāyu + rivātma + dṛk

अन्तर्हितश्च स्थिरजं(ङ्)गमेषु,

ब्रह्मात्मभावेन समन्वयेन ।

व्याप्त्याव्यवच्छेदमसं(ङ्)गमात्मनो,

मुनिर्नभस्त्वं(म्) विततस्य भावयेत् ॥ 42॥

**antarhitaśca sthirajaṅ(ṅ)gameṣu,**

**brahmātmabhāvena samanvayena .**

**vyāptyāvyavacchedamasaṅ(ṅ)gamātmano,**

**munirnabhastvaṃ(m) vitatasya bhāvayet .. 42..**

sthira +jaṅ(ṅ)gameṣu, vyāptyā + vyavacche + damasaṅ(ṅ)ga + mātmano

munir + nabhas + tvaṃ(m)

तेजोऽबन्नमयैर्भावैर्- मेघाद्यैर्वायुनेरितैः ।

न स्पृश्यते नभस्तद्वत्, कालसृष्टैर्गुणैः(फ्) पुमान् ॥ 43॥

**tejo'bannamayairbhāvair- meghādyairvāyuneritaiḥ .**

**na spṛśyate nabhastadvat, kālasṛṣṭairguṇaiḥ(ph) pumān .. 43..**

tejo' + banna + mayair + bhāvair, meghā + dyair + vāyu + neritaiḥ,

nabhas + tad + vat kāla + sṛṣṭair + guṇaiḥ(ph)

स्वच्छः(फ्) प्रकृतितः(स्) स्निग्धो, माधुर्यस्तीर्थभूर्नृणाम् ।

मुनिः(फ्) पुनात्यपां(म्) मित्र- मीक्षोपस्पर्शकीर्तनैः ॥ 44॥

**svacchaḥ(ph) prakṛtitaḥ(s) snigdho, mādhuryastīrthabhūrnṛṇām .**

**muniḥ(ph) punātyapāṃ(m) mitra- mīkṣopasparśakīrtanaiḥ .. 44..**

mādhuryas + tīrtha + bhūr + nṛṇām, mīkṣo + pasparśa + kīrtanaiḥ

तेजस्वी तपसा दीप्तो, दुर्धर्षोदरभाजनः ।

सर्वभक्षोऽपि युक्तात्मा, नादत्ते मलमग्निवत् ॥ 45॥

**tejasvī tapasā dīpto, durdharṣodarabhājanaḥ .**

**sarvabhakṣo'pi yuktātmā, nādatte malamagnivat .. 45..**

dur +dhar + ṣodara + bhājanaḥ, mala + magni + vat

**क्वचिच्छन्नः(ख्) क्वचित् स्पष्ट, उपास्यः(श्) श्रेय इच्छताम् ।**

**भुङ्क्ते सर्वत्र दातृणां(न्), दहन् प्रागुत्तराशुभम् ॥ 46॥**

**kvacicchannaḥ(kh) kvacitspaṣṭa, upāsyaḥ(ś) śreya icchatām .**

**bhuṅkte sarvatra dātṝṇāṃ(n), dahan prāguttarāśubham .. 46..**

kvacic + channaḥ(kh), prāgut + tarā + śubham

**स्वमायया सृष्टमिदं(म्), सदसल्लक्षणं(म्) विभुः ।**

**प्रविष्ट ईयते तत्तत्- स्वरूपोऽग्निरिवैधसि ॥ 47॥**

**svamāyayā sṛṣṭamidaṃ(m), sadasallakṣaṇaṃ(m) vibhuḥ .**

**praviṣṭa īyate tattat- svarūpo'gnirivaidhasi .. 47..**

sadasal + lakṣaṇaṃ(m), tat + tat, svarūpo'g + niri + vaidhasi

**विसर्गाद्याः(श्) श्मशानान्ता, भावा देहस्य नात्मनः ।**

**कलानामिव चन्द्रस्य, कालेनाव्यक्तवर्त्मना ॥ 48॥**

**visargādyāḥ(ś) śmaśānāntā, bhāvā dehasya nātmanaḥ .**

**kalānāmiva candrasya, kālenāvyaktavartmanā .. 48..**

Śmaśā + nāntā, kālenā + vyakta + vartmanā

**कालेन ह्योघवेगेन, भूतानां(म्) प्रभवाप्ययौ ।**

**नित्यावपि न दृश्येते, आत्मनोऽग्नेर्यथार्चिषाम् ॥ 49॥**

**kālena hyoghavegena, bhūtānāṃ(m) prabhavāpyayau .**

**nityāvapi na dṛśyete, ātmano'gneryathārciṣām .. 49..**

hyogha + vegena, ātmano'g + ner + yathār + ciṣām

**गुणैर्गुणानुपादत्ते, यथाकालं(म्) विमुञ्चति ।**

**न तेषु युज्यते योगी, गोभिर्गा इव गोपतिः ॥ 50॥**

**guṇairguṇānupādatte, yathākālaṃ(m) vimuñcati .**

**na teṣu yujyate yogi, gobhirgā iva gopatiḥ .. 50..**

guṇair + guṇā + nupā + datte

**बुध्यते स्वे न भेदेन, व्यक्तिस्थ इव तद्गतः ।**

**लक्ष्यते स्थूलमतिभि- रात्मा चावस्थितोऽर्कवत् ॥ 51॥**

**budhyate sve na bhedena, vyaktistha iva tadgataḥ .**

**lakṣyate sthūlamatibhi- rātmā cāvasthito'rkavat .. 51..**

**नातिस्नेहः(फ्) प्रसङ्गो वा, कर्तव्यः(ख्) क्वापि केनचित् ।**

**कुर्वन् विन्देत सन्तापं(ङ्), कपोत इव दीनधीः ॥ 52॥**

**nātisnehaḥ(ph) prasaṅgo vā, kartavyaḥ(kh) kvāpi kenacit .**

**kurvan vindeta santāpaṃ(ṅ), kapota iva dīnadhīḥ .. 52..**

**कपोतः(ख्) कश्चनारण्ये, कृतनीडो वनस्पतौ ।**

**कपोत्या भार्यया सार्ध- मुवास कतिचित् समाः ॥ 53॥**

**kapotaḥ(kh) kaścanāraṇye, kṛtanīḍo vanaspatau .**

**kapotyā bhāryayā sārdha- muvāsa katicitsamāḥ .. 53..**

kaś + canā + raṇye

**कपोतौ स्नेहगुणित- हृदयौ गृहधर्मिणौ ।**

**दृष्टिं(न्) दृष्ट्यां(ङ्)गमं(ङ्)गेन, बुद्धिं(म्) बुद्ध्या बबन्धतुः ॥ 54॥**

**kapotau snehaguṇita- hṛdayau gṛhadharmiṇau .**

**dṛṣṭiṃ(n) dṛṣṭyāṅ(ṅ)gamaṅ(ṅ)gena, buddhiṃ(m) buddhyā babandhatuḥ .. 54..**

dṛṣṭyāṅ(ṅ) +gamaṅ(ṅ) +gena

**शय्यासनाटनस्थान- वार्ताक्रीडाशनादिकम् ।**

**मिथुनीभूय विस्रब्धौ, चेरतुर्वनराजिषु ॥ 55॥**

**śayyāsanāṭanasthāna- vārtākrīḍāśanādikam .**

**mithunībhūya viśrabdhau, ceraturvanarājiṣu .. 55..**

Śayyā + sanā + ṭanasthāna, vārtā + krīḍā + śanā + dikam,

ceratur + vana + rājiṣu

यं(म्) यं(म्) वाञ्छति सा राजं(व्)स्- तर्पयन्त्यनुकम्पिता ।
तं(न्) तं(म्) समनयत्कामं(ङ्), कृच्छ्रेणाप्यजितेन्द्रियः ॥ 56॥

yaṃ(m) yaṃ(m) vāñchati sā rājan(v)s- tarpayantyanukampitā .
taṃ(n) taṃ(m) samanayatkāmaṃ(ṅ), kṛcchreṇāpyajitendriyaḥ .. 56..

tarpayan + tyanu + kampitā, samanayat + kāmaṃ(ṅ), kṛcchre + ṇāpya + jitendriyaḥ

कपोती प्रथमं(ङ्) गर्भं(ङ्), गृह्णती काल आगते ।
अण्डानि सुषुवे नीडे, स्वपत्युः(स्) सन्निधौ सती ॥ 57॥

kapotī prathamaṃ(ṅ) garbhaṃ(ṅ), gṛhṇatī kāla āgate .
aṇḍāni suṣuve nīḍe, svapatyuḥ(s) sannidhau satī .. 57..

तेषु काले व्यजायन्त, रचितावयवा हरेः ।
शक्तिभिर्दुर्विभाव्याभिः(ख्), कोमलां(ङ्)गतनूरुहाः ॥ 58॥

teṣu kāle vyajāyanta, racitāvayavā hareḥ .
śaktibhirdurvibhāvyābhiḥ(kh), komalāṅ(ṅ)gatanūruhāḥ .. 58..

racitā + vayavā, śaktibhir + durvibhā + vyābhiḥ(kh)

प्रजाः(फ्) पुपुषतुः(फ्) प्रीतौ, दम्पती पुत्रवत्सलौ ।
श्रृण्वन्तौ कूजितं(न्) तासां(न्), निर्वृतौ कलभाषितैः ॥ 59॥

prajāḥ(ph) pupuṣatuḥ(ph) prītau, dampatī putravatsalau .
śṛṇvantau kūjitaṃ(n) tāsāṃ(n), nirvṛtau kalabhāṣitaiḥ .. 59..

तासां(म्) पतत्त्रैः(स्) सुस्पर्शैः(ख्), कूजितैर्मुग्धचेष्टितैः ।
प्रत्युद्गमैरदीनानां(म्), पितरौ मुदमापतुः ॥ 60॥

tāsāṃ(m) patatraiḥ(s) susparśaiḥ(kh), kūjitairmugdhaceṣṭitaiḥ .
pratyudgamairadīnānāṃ(m), pitarau mudamāpatuḥ .. 60..

kūjitair + mugdha + ceṣṭitaiḥ, pratyud + gamai + radīnānāṃ(m)

स्नेहानुबद्धहृदया- वन्योन्यं(म्) विष्णुमायया ।
विमोहितौ दीनधियौ, शिशून् पुपुषतुः(फ्) प्रजाः ॥61॥

snehānubaddhahṛdayā- vanyonyaṃ(m) viṣṇumāyayā .

vimohitau dīnadhiyau, śiśūn pupuṣatuḥ(ph) prajāḥ .. 61..

snehā + nubaddha + hṛdayā

एकदा जग्मतुस्तासा-मन्नार्थं(न्) तौ कुटुम्बिनौ ।

परितः(ख्) कानने तस्मिन्- नर्थिनौ चेरतुश्चिरम् ॥ 62॥

ekadā jagmatustāsā- mannārthaṃ(n) tau kuṭumbinau .

paritaḥ(kh) kānane tasmin- narthinau ceratuściram .. 62..

jag + matus + tāsā, man + nārthaṃ(n), ceratuś + ciram

दृष्ट्वा ताँल्लुब्धकः(ख्) कश्चिद्, यदृच्छातो वनेचरः ।

जगृहे जालमातत्य, चरतः(स्) स्वालयान्तिके ॥63॥

dṛṣṭvā tānlubdhakaḥ(kh) kaścid, yadṛcchāto vanecaraḥ .

jagṛhe jālamātatya, carataḥ(s) svālayāntike .. 63..

Tān + lubdhakaḥ(kh), jāla + mātatya, svā + layān + tike

कपोतश्च कपोती च, प्रजापोषे सदोत्सुकौ ।

गतौ पोषणमादाय, स्वनीडमुपजग्मतुः ॥ 64॥

kapotaśca kapotī ca, prajāpoṣe sadotsukau .

gatau poṣaṇamādāya, svanīḍamupajagmatuḥ .. 64..

sadot + sukau, poṣaṇa + mādāya, svanī + ḍamupa + jagmatuḥ

कपोती स्वात्मजान् वीक्ष्य, बालकान् जालसंवृतान् ।

तानभ्यधावत् क्रोशन्ती, क्रोशतो भृशदुःखिता ॥ 65॥

kapotī svātmajān vīkṣya, bālakān jālasaṃvṛtān .

tānabhyadhāvat krośantī, krośato bhṛśaduḥkhitā .. 65..

Svāt + majān, jāla + saṃvṛtān, tānabhya + dhāvat + krośantī, bhṛśa + duḥkhitā

सासकृत्स्नेहगुणिता, दीनचित्ताजमायया।

स्वयं(ञ्) चाबध्यत शिचा, बद्धान् पश्यन्त्यपस्मृतिः ॥ 66॥

**sāsakṛtsnehaguṇitā, dīnacittājamāyayā .**

**svayaṃ(ñ) cābadhyata śicā, baddhān paśyantyapasmṛtiḥ .. 66..**

sāsakṛt + sneha + guṇitā, dīna + cittā + jamāyayā,

paśyantya + pasmṛtiḥ

**कपोतश्चात्मजान् बद्धा- नात्मनोऽप्यधिकान् प्रियान् ।**

**भार्यां(ञ्) चात्मसमां(न्) दीनो, विललापातिदुःखितः ॥ 67॥**

**kapotaścātmajān baddhā- nātmano'pyadhikān priyān .**

**bhāryāṃ(ñ) cātmasamāṃ(n) dīno, vilalāpātiduḥkhitaḥ .. 67..**

Kapotaś + cātmajān, nātmano' + pyadhikān

cāt + masamāṃ(n), vilalā + pāti + duḥkhitaḥ

**अहो मे पश्यतापाय- मल्पपुण्यस्य दुर्मतेः ।**

**अतृप्तस्याकृतार्थस्य, गृहस्त्रैवर्गिको हतः ॥ 68॥**

**aho me paśyatāpāya- malpapuṇyasya durmateḥ .**

**atṛptasyākṛtārthasya, gṛhastraivargiko hataḥ .. 68..**

Paśya + tāpāya, malpa + puṇyasya, atṛptas + yākṛtār + thasya,

gṛhas + traivar + giko

**अनुरूपानुकूला च, यस्य मे पतिदेवता ।**

**शून्ये गृहे मां(म्) सन्त्यज्य, पुत्रैः(स्) स्वर्याति साधुभिः ॥ 69॥**

**anurūpānukūlā ca, yasya me patidevatā .**

**śūnye gṛhe māṃ(m) santyajya, putraiḥ(s) svaryāti sādhubhiḥ .. 69..**

Anurūpā + nukūlā, san + tyajya

**सोऽहं(म्) शून्ये गृहे दीनो, मृतदारो मृतप्रजः ।**

**जिजीविषे किमर्थं(म्) वा, विधुरो दुःखजीवितः ॥ 70॥**

**so'haṃ(m) śūnye gṛhe dīno, mṛtadāro mṛtaprajaḥ .**

**jijīviṣe kimarthaṃ(m) vā, vidhuro duḥkhajīvitaḥ .. 70..**

तां(व्)स्तथैवावृतान्छिग्भिर्- मृत्युग्रस्तान् विचेष्टतः ।
स्वयं(ञ्) च कृपणः(श्) शिक्षु, पश्यन्नप्यबुधोऽपतत् ॥ 71॥

tāṃ(v)stathaivāvṛtānchigbhir- mṛtyugrastān viceṣṭataḥ .
svayaṃ(ñ) ca kṛpaṇaḥ(ś) śikṣu, paśyannapyabudho'patat .. 71..

tāṃ(v)s + tathaivā + vṛtān + chigbhir, mṛtyu + grastān,
paśyan + napya + budho'patat

तं(म्) लब्ध्वा लुब्धकः(ख्) क्रूरः(ख्), कपोतं(ङ्) गृहमेधिनम् ।
कपोतकान् कपोतीं(ञ्) च, सिद्धार्थः(फ्) प्रययौ गृहम् ॥ 72॥

taṃ(m) labdhvā lubdhakaḥ(kh) krūraḥ(kh), kapotaṃ(ṅ) gṛhamedhinam .
kapotakān kapotīṃ(ñ) ca, siddhārthaḥ(ph) prayayau gṛham .. 72..

एवं(ङ्) कुटुम्ब्यशान्तात्मा, द्वन्द्वारामः(फ्) पतत्त्रिवत् ।
पुष्णन् कुटुम्बं(ङ्) कृपणः(स्), सानुबन्धोऽवसीदति ॥ 73॥

evaṃ(ṅ) kuṭumbyaśāntātmā, dvandvārāmaḥ(ph) patattrivat .
puṣṇan kuṭumbaṃ(ṅ) kṛpaṇaḥ(s), sānubandho'vasīdati .. 73..

kuṭumbya + śāntātmā, patat +trivat, sānubandho' + vasīdati

यः(फ्) प्राप्य मानुषं(म्) लोकं(म्), मुक्तिद्वारमपावृतम् ।
गृहेषु खगवत् सक्तस्- तमारूढच्युतं(म्) विदुः ॥ 74॥

yaḥ(ph) prāpya mānuṣaṃ(m) lokaṃ(m), muktidvāramapāvṛtam .
gṛheṣu khagavatsaktas- tamārūḍhacyutaṃ(m) viduḥ .. 74..

Mukti + dvāra + mapāvṛtam, tamā + rūḍha + cyutaṃ(m)

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)
सं(व्)हितायामेकादशस्कन्धे सप्तमोऽध्यायः ।।

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(v)syāṃ(m)
saṃ(v)hitāyāṃ ekādaśaskandhe saptamo'dhyāyaḥ .. 7..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

ॐ शान्तिः(श्) शान्तिः(श्) शान्तिः।।

**Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|**

**Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||**

**Om Shāntih(ś) Shāntih(ś) Shāntih ||**

